# ॥ श्रीवरवरमुनिसंवत्सरमाला ॥

अस्मिन् स्तोत्रे नियमद्वयमङ्गीकृतम् ।

संवत्सरनाम्नां पद्योपक्रम एव विन्यासः,

प्रतिपद्यं पद्यारम्भविन्यस्तवर्णस्यैव प्रतिपादोपक्रमं विन्यासश्च ।

प्रभवो बहवस्सन्ति प्रसिद्धा भुवि सन्तु ते ।
प्रज्ञानिधिर्वरो योगी प्रभुरेको विवेकिनाम् ॥ १ ॥

विभवान्विविधान् सद्भ्यः वितरीतुं प्रकल्पते ।
विशिष्य वरयोगीन्द्रविभवध्यानवासना ॥ २ ॥

शुक्लपक्षेन्दुवन्नित्यं शुद्धसत्त्वं प्रवर्धते ।
शुभ्रां रम्यमुनेर्मूर्तिं शुद्धे मनसि भेजुषाम् ॥ ३ ॥

प्रमोदोऽतनुरस्माकं प्रवृद्धिं हृदि विन्दति ।
प्रसिद्धवरयोगीन्द्रप्रभावध्यानहेतुना ॥ ४ ॥

प्रजोत्पत्तिकृतौ नित्यं प्रवीणो विष्णुरस्तु सः ।
प्रजातानां प्रबोधार्थं प्रजज्ञेऽसौ वरो मुनिः ॥ ५ ॥

---

१ परमतः = अतः परमिति यावत् ।

$ आङ्गीरसकृदानन्दमावहन्तीर्महस्ततीः ।
आविष्कुर्वन्समैवान्तरातिष्ठति वरो मुनिः ॥ ६ ॥
श्रीमुखाम्भोजनिर्गच्छच्छ्रीसूक्त्यमृतवर्षणैः ।
श्रीवैष्णवमतोद्धर्ता श्रीरम्यमुनिरेधताम् ॥ ७ ॥
भवसागरसन्तारो भवत्विति यदीच्छथ ।
भक्तिं वरमुनीन्द्रस्य भव्योक्तिषु करिष्यथ ॥ ८ ॥
युवत्वं प्राप्नुवां सा भूद्यौवनस्य वृथा व्ययः ।
युक्तं सुन्दरजामातृयोगिश्रीसूक्तिचिन्तनम् ॥ ९ ॥
धातुसाम्ये सति स्वैरं धावद्भिः किं नु साध्यते ।
धारणार्हा सतां कण्ठे धार्यतां वरयोगिवाक् ॥ १० ॥
ईश्वरो जगतां विष्णुरीर्यते तत्र कल्पहे ।
इष्टे वरमुनीन्द्रोऽसौ ईश्वरस्यापि पोषणे ॥ ११ ॥
वसुधान्यधनेच्छाभिर्बहुधा भ्रमतां भुवि ।
बद्धानां वरयोगीन्द्रो बहुशो नैति मानसम् ॥ १२ ॥
प्रमा दिव्यप्रबन्धेषु प्राप्स्येति समुत्सुकाः ।
प्राज्ञाः वरमुनीन्द्रोक्तीः प्रकामं चिन्तयन्त्विह ॥ १३ ॥

(अथवा श्लोकान्तरम्)

प्रमाथि चञ्चलं चेति प्रोक्तं गीतासु यन्मनः ।
प्रसभं यो जिगायैतत् प्रसिद्धस्स वरो मुनिः ॥ १३ ॥

---

$ आनन्दमावहन्तीः । आङ्गीः = अङ्गसंबन्धिनीः (स्वदिव्यमङ्गलविग्रहस्येति यावत्) महस्ततीः । असकृदाविष्कुर्वन् ।

विक्रम वाचि विश्राणा विद्वांसोऽपि ह्यसूयया ।
विह्वला वरयोगीन्द्रविभवापह्नवोत्सुकाः ॥ १४ ॥

वृषभं मुनिवर्याणां वृद्धं विज्ञानिनां सताम् ।
वृणोमि वरयोगीन्द्रं वृजिनानां प्रशान्तये ॥ १५ ॥

('विषु' इति वत्सरनामपक्षे पद्यान्तरम् ।)

विष्वग्व्यापियशःकायविशेषेण विभासुरः ।
विमलो वरयोगीन्द्रः विजयेत शतं समाः ॥ १५ ॥

चित्रभानुलसद्भूपश्रिस्समग्रेऽस्तु मे हरिः ।
चिन्तयेयमहंत्वेकं चिन्ताभोग्यं वरं मुनिम् ॥ १६ ॥

स्वभानुभिस्तमो बाह्यं स्वतो हन्ति दिवाकरः ।
स्वादुसूक्तिर्महायोगी स्वगीभिरन्त्वान्तरं तमः ॥ १७ ॥

तारणो भववाराशेः तारकेशसमाननः ।
तापहृद्वरयोगीन्द्रः तामसीं मे मतिं हतात् ॥ १८ ॥

पार्थिवान् धनदर्पाढ्यान् पामरान् प्रति गन्तृभिः ।
पावनं वरयोगीन्द्रपादाब्जमभिगम्यताम् ॥ १९ ॥

व्ययं वाचां वितन्वन्ति व्यर्थमेव बुधा अपि ।
व्यथां वरमुनिस्तोत्रैर्व्यपोहन्तु विवेकिनः ॥ २० ॥

सर्वजिद्भगवान्विष्णुः स हि रङ्गेश्वरात्मना ।
सच्छिष्यो वरयोगीन्द्रे सन् कृतार्थो विराजते ॥ २१ ॥

सर्वधारी हरिस्साक्षात् स एवेति न मन्महे ।
सर्वज्ञो वरयोगी हि सर्वाधारः स्वसूक्तिभिः ॥ २२ ॥

विरोधीति कमप्यस्यां विपुलायामभावयन् ।
विख्यातो वरयोगीन्द्रो विलक्षणगुरूत्तमः ॥ २३ ॥

विकृतिं यान्ति भूयांसो विषयग्रामवीक्षणैः ।
विकृता वरयोगीन्द्रविशदोक्तिभरैर्वयम् ॥ २४ ॥

खरा इव विवेकान्धाः खलाः केचिदसूयया ।
खलु निन्दन्ति योगीन्द्रं खर्वेतरमदोल्बणाः ॥ २५ ॥

नन्दनन्दन कृष्णेति नामोक्तीरहमुत्सृजन् ।
नन्देयं वरयोगीन्द्रनामध्यानैकनिष्ठया ॥ २६ ॥

विजयो विपुलस्तेषां विख्यातिश्च विसृत्वरी ।
विश्रुतान्वरयोगीन्द्रविभवान् ये विवृण्वते ॥ २७ ॥

जय एव भवेन्नित्यं जगत्यां न पराजयः ।
जय रम्योपयन्त्रार्य ! जयेत्येव प्रघुष्यताम् ॥ २८ ॥

मन्मथाज्ञाभटाः प्रायो मत्या माद्यन्ति संसृतौ ।
महायोगिमहिष्ठोक्तिमधुपानमदस्तु मे ॥ २९ ॥

दुर्मुखीति प्रसिद्धानां दुष्टानां सेवनैरलम् ।
दुःखं त्यजत योगीन्द्रदुग्धाब्धोदग्रसूक्तिभिः ॥ ३० ॥

हे विलम्बितुमर्हं न हेयोपादेयवेदिनः ! ।
हेलयैव महायोगिहेमपादाम्बुजं स्तुत ॥ ३१ ॥

विलम्बिकुण्डलोल्लासिविशुद्धमुखपङ्कजः ।
विष्णुस्तिष्ठतु दूरे मे विष्वग्वरमुनीक्षितुः ॥ ३२ ॥

विकारिता तु हेयेति विद्वांसोऽपि विदन्त्यहो ।
विकारो वरयोगीन्द्रविभवध्यानजोऽनघः ॥ ३३ ॥

‡ शार्वरीशप्रभाजिष्णुशान्तमूर्तेस्सदुक्तिभिः ।
शाम्यन्त्यघानि नः क्षान्तिशालिनो वरयोगिनः ॥ ३४ ॥

प्लवालाभात् सदा चोपप्लवखिन्ना भवाम्बुधौ ।
प्लवं वरमुनीन्द्राङ्घ्रिपल्लवं वृण्वतां दृढम् ॥ ३५ ॥

शुभकृत्प्रथितो विष्णुः शुभं किमपि नाकरोत् ।
शुशुभे रम्ययोगीन्द्रः शुभकारी स्वशक्तिभिः ॥ ३६ ॥

$ शोफकृत्तामसाहारैः शोचनीयदशां गताः ।
शोधयन्तु मुनीन्द्राङ्गशोभाध्यानैर्निजां तनूम् ॥ ३७ ॥

क्रोधी जनो वृथैवात्र क्रोशतीर्ष्यावशंवदः ।
क्रोधकामादिविध्वंसकोविदे वरयोगिनि ॥ ३८ ॥

विश्वा वसुमती तेषां विशेषेण वशंवदा ।
विदतां रम्यजामातृविभवानखिलानपि ॥ ३९ ॥

---

‡ शार्वरीशः = चन्द्रः तदुपरि सम्बन्धार्थे अण् ; आदिवृद्धिः.

$ शोफः स्थौल्यम् । (தடிப்பு) शरीरस्थौल्यसंपादकतामसाहार-स्वीकरणेन " உடம்பில் மேடுபருத்திருப்பார்.

परामवः कदाऽप्यस्मान् परत्रात्र च न स्पृशेत् ।
पवित्रवरयोगीन्द्रपदपङ्कजसेविनः ॥ ४० ॥

प्लवं गवेषमाणा ये प्लवन्ते भवसागरे ।
प्लवं वरमुनिं प्राप्य प्लवगा इव यान्तु ते ॥ ४१ ॥

¶ कीलकोत्पाटनोद्युक्तकीशन्यायेन पामराः ।
कीर्तिं वरमुनीन्द्रस्य कियन्तो दूषयन्त्यहो ॥ ४२ ॥

† सौम्यजामातृभगवान् सौम्यजामातृयोगिनः ।
सौम्यसूक्तिततीः श्रुत्वा सौम्यं पद्यं व्यजिज्ञपत् ॥ ४३ ॥

साधारणाह्वये वर्षे साक्षाद्रामानुजो मुनिः ।
साधु संरक्षितुं भूयः साधून्वरमुनिर्बभौ ॥ ४४ ॥

विरोधि कृत्स्नं दुर्ध्वान्तं विध्वंसयितुमुद्यतः ।
विलक्षणो रविर्जज्ञे विशदोक्तिर्वरो मुनिः ॥ ४५ ॥

परिधावी मुहुर्जन्मपर्यायेष्वेष पामरः ।
पश्यन्वरमुनीन्द्रस्य पदपद्मं प्रमोदते ॥ ४६ ॥

प्रमादी चरताजन्तुः प्रलयावधि संसृतौ ।
प्रभजेद्वरयोगीन्द्रप्रवणश्चेत्परां मुदम् ॥ ४७ ॥

---

¶ कीलोत्पाटीव वानर इतीदं आर्यभाषितं; दूषणप्रवृत्तिः स्वेषामेव अपायसंपादनक्षमेत्युक्तं भवति ।

† श्रीसौम्यजामातृभगवान्—श्रीरङ्गनाथः । அழகியமணவாளன்.

आनन्दममितं दिव्यम् आसादयितुमिच्छताम् ।
आराध्ये रम्यजामातुरादरेण पदाम्बुजे ॥ ४८ ॥

राक्षसानां वधायैव रामो जज्ञेऽथ लक्ष्मणः ।
रम्ययोगीन्द्ररूपेण रक्षितुं पापिनोऽभ्युदैत् ॥ ४९ ॥

न लक्ष्यं यमदूतानां नखायुधमुखेप्सताम् ।
नरकेषु भवेयुर्ये नमन्ति वरयोगिनम् ॥ ५० ॥

$ पिङ्गलाक्रीतसोमोत्थं पिबन्तु कतिचिद्रसम् ।
पीत्वा वरमुनीन्द्रोक्तिपीयूषं पुष्कला वयम् ॥ ५१ ॥

¶ कालयुक्तिरशेषाणां काले स्यादेव हे नराः ।
कान्तोपयन्तृयोगीन्द्रकारुण्यं प्राप्य तृप्यत ॥ ५२ ॥

* सिद्धार्थित्वं तु नैवात्र सिद्धमित्यपरे जगुः ।
सिद्धा रम्यमुनेस्सूक्त्या सिद्धोपायार्थिनेव नः ॥ ५३ ॥

---

$ स्वर्गप्रेप्सया यागकर्तारः सोमरसपानं कुर्वन्ति । सोमलता च अरण्यात् स्वत एव न आप्ता । * पिङ्गलैकहायन्या सोमं क्रीणीयात् इति षष्ठकाण्डोक्तरीत्या पिङ्गलवर्णधेनु दत्वा सोमक्रयणं कर्तव्यम् । एतादृशान् परिश्रमान् अन्ये वहन्तु, वयं तु अनायासमेव श्रीवरवरमुनिसूक्तिदिव्यामृतपायिन इत्युक्तं भवति ।

¶ कालयुक्ति–कालेन (यमेन) सह योगः ; निधनम् ।

* लोके साध्यवस्तुविषयेष्वेव अर्थित्वं युज्यते ; न तु सिद्धवस्तुविषये इति मत्वा इतरे सिद्धे भगवति अविस्रम्भात् साध्योपायविश्वासिनस्सन्तः ताम्यन्ति । चरमश्लोकोक्तरीत्या सिद्धवस्तुन्येवार्थित्वं स्वरूपानुरूपमिति श्रीवरवरमुनीन्द्रसूक्तिसारांशः ।

(अथ वा श्लोकान्तरम्)

† सिद्धार्थिता यदि श्रीमत्सौम्यजामातृयोगिनि ।
सिद्धयन्त्येव समस्तार्थाः सिद्धान्तोऽयमनर्गलः ॥ ५२ ॥
‡ रौद्रीं धनुर्लतामल्पां रामश्चिच्छेद किं नु तत् ।
रौद्रसंसारगुल्मौघान् रम्ययोगी छिनत्ति नः ॥ ५४ ॥
दुर्मतिध्वंसनीस्सूक्तीः दुग्धेस वरयोगिराट् ।
दूषयन्तः परे तास्तु दुरितान्यार्जयन्त्यहो ॥ ५५ ॥
दुन्दुभिध्वान्ततत्तुल्यैर्दूषणोक्तिविघोषणैः ।
दोषदूरस्थयोगीन्द्रं दूषयन्तो भुवो भराः ॥ ५६ ॥
रुधिरोद्गारिवाणौघान् रूक्षान् क्षेप्तुं पटुर्हरिः ।
रुचिरोक्तिभिरेवासौ रुन्धे * सर्वान्वरो मुनिः ॥ ५७ ॥
रक्ता क्षिप्रं रसज्ञा मे रम्ययोगीन्द्रकीर्तने ।
रमारमणमुत्सृज्य रात्रन्दिवमुदञ्चति ॥ ९८ ॥
क्रोधनो दारुणो मूर्खः क्रूर इत्युक्तिगोचरः ।
कोऽपि नैव भवेद्वंशे कान्तयोगीन्द्रसेविनाम् ॥ ५९ ॥
अक्षयास्सम्पदस्सर्वा अत्रामुत्र च लिप्सवः ।
अभिराममुनिस्तोत्रमनुसन्दधतामिदम् ॥ ६० ॥

---

† श्रीसौम्यजामातृयोगिसंनिधौ याचकानां सर्वार्थसिद्धिरवश्यम्भाविनीति भावः।

‡ रुद्रस्य इयं रौद्री ।

* सर्वान्—अनुकूलान् प्रतिकूलांश्च ।